International Journal of Sanskrit Research 2014; 1(1): 58-61

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2014; 1(1): 58-61
© 2014 IJSR
www.anantaajournal.com
Received: 22-09-2014
Accepted: 28-10-2014

**डॉ. अशोक कुमार झा**
व्याख्याता- व्याकरण-शास्त्रम्, राजकीय-धूलेश्वर-आचार्य-संस्कृत-महाविद्यालयः, मनोहरपुरम्, जयपुरम् राजस्थानम्, भारत

**Corresponding Author:**
**डॉ. अशोक कुमार झा**
व्याख्याता- व्याकरण-शास्त्रम्, राजकीय-धूलेश्वर-आचार्य-संस्कृत-महाविद्यालयः, मनोहरपुरम्, जयपुरम् राजस्थानम्, भारत

# लौकिकन्यायानां व्याकरणशास्त्रोपयोगित्वम्

**डॉ. अशोक कुमार झा**

**प्रस्तावना**

अस्मिन् जगति अनेके न्यायाः सन्ति येषाम् उपयोगो लौकिकसमस्यानां समाधानाय क्रियते, तस्माद् इमे न्यायाः लौकिकन्यायरूपेण प्रसिद्धाः सन्ति। एते न्यायाः लौकिकन्यायाः कथ्यन्ते? परं तेषु केचन न्यायाः एतादृशाः अपि सन्ति, येषाम् उपयोगो व्याकरणशास्त्रगतसमस्यानां समाधानाय अपि क्रियते। कथं एते न्यायाः व्याकरणशास्त्रोपयोगिनः सन्ति? कथं तत्र व्याकरणशास्त्रोपयोगित्वं विद्यते? इति सर्वम् अत्र शोधपत्रे चर्चिष्यते। तत्र प्रथमो न्यायो योऽत्र स्वीक्रियते, सोऽस्ति-

एकदेशविकृतमनन्यवत्[1]

**प्रकृतपरिभाषायाः** प्रस्तावना- यथा वयं जानीमो यद् व्याकरणशास्त्रे पक्षद्वयं विद्यते- यथोद्देशपक्षः, कार्यकालपक्षश्च। यथोद्देशपक्षे तु राम+औ इति अवस्थायाम् "सुप्तिङन्तं पदम्"[2] सूत्रेण राम+औ इत्यस्य सुबन्ततदादित्वात् पदसंज्ञा क्रियते। अनन्तरं वृद्धिरूपैकादेशे[3] कार्ये सति राम+औ इत्यस्य स्थाने रामौ इति आदेशो भवति एतत्प्रकारकम् आनुमानिकं स्थान्यादेशं स्वीकृत्य स्थानिवद्भावेन पद-संज्ञा सुलभा भवति। कार्यकालपक्षे तु यदा कार्यम् आपतितं भवति तदा संज्ञा क्रियते, तस्माद् कारणात् राम+औ इत्यत्र अकारौकारयोः स्थाने वृद्धिरेकादेशरूपकार्ये सति प्रकृतिप्रत्ययभागयोरपहारो जायते अर्थात् प्रकृतिप्रत्ययभागयोः स्थाने औ वद्धिर्भवति येन रामौ इत्यत्र प्रकृतिप्रत्ययभागयोः स्पषटरूपेण ज्ञानं न भवति यत् कः प्रकृतिभागः कश्च प्रत्ययभागः। अस्यां परिस्थितौ सुबन्ततदादेः या पदसंज्ञा "सुप्तिङन्तं पदम्" सूत्रेण क्रियते सा कथं सम्भवति?

न च "अन्तादिवच्च"[4] सूत्रेण अकारौकारयोः स्थाने जायमानस्य वृद्धिरेकादेशस्य औ इत्यस्य परादिवद्भावेन सुप्त्वात् तथा च पूर्वान्तवद्भावेन तदादित्वाद् अर्थात् प्रकृतित्वात् सुबन्ततदादिरूपप्रकृतिप्रत्ययभागयोः लाभात् "सुप्तिङन्तं पदम्" सूत्रेण पद-संज्ञा सुलभा भवतीति वाच्यम्, उभयत आश्रयणे नान्तादिवत्[5] इति नियमस्य सत्त्वात्। अर्थात् "अन्तादिवच्च" सूत्रस्य आश्रयणं परादिवद्भावेन पूर्वान्तवद्भावेन च एकत्र स्थले उभयविधप्रकारेण कर्तुं न शक्यते।

न च भ[6]-संज्ञाविषये पद-संज्ञाविषये च यथोद्देशपक्ष एव स्वीक्रियते[7], अतः कार्यकालपक्षे पद-संज्ञाविषयको दोषारोपोऽनुचित इति वाच्यम्, भ-संज्ञायाः साहचर्येण "स्वादिष्वसर्वनामस्थाने"[8] सूत्रेण या पद-संज्ञा क्रियते, तस्या एव प्रकृतस्थले ग्रहणात्। अर्थात् यथोद्देशपक्षे भ-संज्ञायाः साहचर्येण "स्वादिष्वसर्वनामस्थाने" सूत्रेण या पद-संज्ञा क्रियते, तस्या एव ग्रहणं भवति। अत्र तु "सुप्तिङन्तं पदम्" सूत्रेण पद-संज्ञा विधीयते। अतः अत्र स्थले कार्यकालपक्षेऽपि पद-संज्ञायाः प्रवृत्तिर्भवितुं शक्नोति। तस्मादत्र कार्यकालपक्षेऽपि सुबन्ततदादिरूपा पद-संज्ञा स्यात् तदर्थं लौकिकन्यायरूपा परिभाषा स्वीक्रियते- एकदेशविकृतमनन्यवत्।

---

[1] श्री-विश्वनाथमिश्रस्य 'सुबोधिनी' हिन्दीव्याख्योपेते परिभाषेन्दुशेखरे, मूले, पृष्ठसंख्या- 147
[2] पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 1/4/14
[3] वृद्धिरेचि- 6/1/88
[4] पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 6/1/85
[5] श्री-विश्वनाथमिश्रस्य 'सुबोधिनी' हिन्दीव्याख्योपेते परिभाषेन्दुशेखरे, मूले, पृष्ठसंख्या- 146
[6] यचि भम्- 1/4/18
[7] श्री-विश्वनाथमिश्रस्य 'सुबोधिनी' हिन्दीव्याख्योपेते परिभाषेन्दुशेखरे, मूले, पृष्ठसंख्या- 13
[8] पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 1/4/17

**प्रकृतपरिभाषार्थः-** एकदेशः=स्वावयवः। विकृतशब्दे वि उपसर्गपूर्वकात् कृ-धातोः भावेऽर्थे क्त-प्रत्ययो विद्यते। अनन्तरं विकृतम् अस्ति अस्मिन् इत्यस्मिन् अर्थे "अर्शआदिभ्योऽच्"[9] इति सूत्रेण मत्वर्थीयोऽच्-प्रत्ययो भवति, येन विकृतरिति शब्दस्य अर्थो भवति विकृतिमान्। एकदेशो विकृतो यस्मिन् इति एकदेशविकृतम्। एकदेशविकृतम् अन्यवद् न भवति।

**समस्यायाः समाधानम्-** प्रकृतपरिभाषायाः उक्तार्थेन अर्थात् अन्यसदृशस्य निषेधाभावे राम-शब्दावयवयस्य अकारस्य वृद्धिद्वारा विकृतानन्तरं केवलम् अकाररहितो मकारान्तः राम्-शब्दः सुतराम् एव अकारसहितात् राम-शब्दात् भिन्नो न भवति। अतः रामौ इत्यत्र **औ** इत्यस्य परादिवद्भावेन सुप्त्वात् तथा च प्रकृतपरिभाषया मकारान्ते राम्-शब्दे यस्माद्विहितस्तदादित्वस्य= प्रकृतेः= दशरथापत्यस्य सत्त्वेन सुबन्ततदादेः रामौ इत्यस्य "सुप्तिङन्तं पदम्" सूत्रेण पद-संज्ञा क्रियते। छिन्नपुच्छे शुनि श्वत्वव्यवहारवन्मान्ते राम्-शब्दे तत्त्वम्= आर्थसमाजग्रस्तत्वं[10] लोकन्यायेनैव सिद्धत्वाद् अयं न्यायः लोकसिद्धो विद्यते। अत एव "प्राग्दीव्यतोऽण्[11] सूत्रे, भाष्ये दीव्यति इति शब्दस्य एकदेशभूतस्य **दीव्यत्** इत्यस्य विकृतनिर्देशस्य अनुकरणं[12] प्रकृतपरिभाषाया समर्थनं करोति। तस्मात् प्रकृतपरिभाषायाः लौकिकन्यायसिद्धत्वाद् अस्याः शास्त्रीयकार्य एव शास्त्रीयविकार एव प्रवृत्तिर्भवति इति कथनम् अपास्तं भवति।[13]

**कश्चन विशेषः-** परिभाषेयं विकृतावयवमूलककार्ये प्रवृत्तिं नार्हति। अर्थात् यथा अनया परिभाषया छिन्नपुच्छे शुनि पुच्छवत्त्वव्यवहारो न भवति तथैव विकृतावयवे सावयवस्य व्यवहारो न भवति। तस्मादेव कारणात् "पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु"[14] सूत्रेण अकारान्तस्य मास-शब्दस्य स्थाने हलन्तस्य मास् इति शब्दस्य आदेशानन्तरं प्रकृतपरिभाषया आदेशभूतं हलन्तं मास् इति शब्दम् अकारान्तं मास-शब्दं मत्वा ततः परस्य भिस्-प्रत्ययस्य स्थाने "अतो भिस ऐस्"[15] सूत्रेण ऐस् आदेशो न भवति। एवमेव अक्तपरिमाणग्रहणेऽपि एषा परिभाषा प्रवृत्तिं नार्हति। अक्तपरिमाणः= परिच्छिन्नपरिमाणः, अर्थात् संख्यावाचके परिमाणवाचके च शब्दे अस्याः परिभाषायाः प्रवृत्तिर्न भवति। अन्यथा एकोनशतस्य जनानां कृतेऽपि शतं जनाः इति व्यवहारो भविष्यति। एतत्सर्वम् "येन विधिस्तदन्तस्य"[16] सूत्रस्य भाष्ये कैयटे च ध्वनितमस्ति।[17]

**परिभाषाया अप्राप्तिस्थलम्-** न च अनयैव परिभाषया सर्वत्र कार्यसम्पादने सति "स्थानिवदादेशोऽनल्विधौ"[18] सूत्रस्य वैयर्थ्यमिति वाच्यम्, अर्द्धविकृतस्थले, अर्द्धाधिकविकृतस्थले, सम्पूर्णविकृतस्थले अनल्विधिस्थले च "स्थानिवदादेशोऽनल्विधौ" सूत्रस्य उपयोगात्। अर्द्धविकृतस्थले, अर्द्धाधिकविकृतस्थले सम्पूर्णविकृतस्थले च जातिबोधकस्य अधिकावयवस्य दर्शनाभावाद् तथा च अल्भिन्ने स्थले "स्थानिवदादेशोऽनल्विधौ" सूत्रस्य उपयोगो भवति। अर्द्धविकारस्य उदाहरणम्- जूर्णः। अत्र ज्वर्-धातोः क्त-प्रत्यये सति "ज्वरत्वरश्रिव्यविमवामुपधायाश्च"[19] सूत्रेण उपधायाः वकारस्य च स्थाने ऊठ् आदेशो भवति। एवम्प्रकारेण अत्र अर्द्धविकारो दृश्यते। अर्द्धाधिकविकारस्य उदाहरणं विद्यते- त्वदीयः। अत्र युष्मद्-शब्दस्य युष्म् इति मपर्यन्तस्य भागस्य स्थाने त्व-आदेशो भवति।[20] सम्पूर्णविकारस्य उदाहरणं विद्यते- रामाय। राम+ङे इत्यवस्थायाम् सम्पूर्णस्य ङे इत्यस्य स्थाने "ङेर्यः"[21] सूत्रेण य आदेशो भवति। अत्र सर्वत्र स्थलेषु जातिबोधकस्य अधिकावयवस्य दर्शनाभावाद् "स्थानिवदादेशोऽनल्विधौ" सूत्रेण स्थानिवद्भावद्वारा कार्यसम्पादनं भवति। अल्भिन्नस्य स्थलस्य उदाहरणम् अस्ति- बहुयज्वा स्त्री। बहुयज्वन्-शब्दात् आचष्टे अर्थे णिच्-प्रत्यये[22], तस्य णिच्-प्रत्ययस्य इष्ठवद्भावे[23] "टेः"[24] सूत्रेण टि-भागस्य अन् इत्यस्य लोपे कृते बहुयज्व्+इ इत्यवस्थायाम् "क्विप् च"[25] सूत्रेण बहुयज्वि-धातोः[26] कर्त्रर्थे क्विप्-प्रत्यये, क्विप्-प्रत्ययस्य सर्वापहारिणि लोपे कृते अनन्तरम् "प्रत्ययलोपे प्रत्ययलक्षणम्"[27] परिभाषासूत्रबलेन अनिडादिः आर्धधातुकसंज्ञकः क्विप्-प्रत्ययः परे अस्ति इति मत्वा णिचः इकारस्य "णेरनिटि"[28] सूत्रेण लोपे सति अनः अल्विधित्वाभावात् "स्थानिवदादेशोऽनल्विधौ" सूत्रेण स्थानिवद्भावद्वारा अनः आनयनं भवति तथा च बहुयज्व् इति अन्नन्तं मत्वा "डाबुभाभ्यामन्यतरस्याम्"[29] सूत्रेण स्त्रीत्वबोधकं टाप्-प्रत्ययं विधाय बहुयज्वा इति निष्पाद्यते।

**लक्ष्यानुरोधेन परिभाषाया अप्राप्तिस्थलम्-** क्वचित् लक्ष्यानुरोधेन प्रकृतपरिभाषायाः प्राप्तिर्नापि भवति। यथा- अभीयात् इति। अभि उपसर्गपूर्वकाद् इण्-धातोः आशीर्लिङ्-लकारे ईयात् इत्यस्य निष्पादनानन्तरम् अभि+ईयात् इत्यवस्थायां सवर्णदीर्घद्वारा अभीयात् इति रूपं निष्पद्यते। अत्र यदि परादिवद्भावेन ईकारः इण्-धातुरिति स्वीक्रियते तथा च एकदेशविकृतमनन्यवत् इति परिभाषया अभ् इति अभि इति उपसर्गरूपेण स्वीक्रियते चेद् अत्र "एतेर्लिङि"[30] सूत्रेण ईकारस्य स्थाने ह्रस्वादेशस्य प्राप्तिर्भवति तथा च अनिष्टप्रयोगस्य सिद्धिः प्राप्नोति। अतः लक्ष्यानुरोधेन प्रकृतपरिभाषायाः अत्र प्राप्तिर्न भवति।

### आगमशास्त्रमनित्यम्

**प्रकृतपरिभाषायाः प्रस्तावना- प्रभवाणि** इत्यत्र प्र+भवानि इत्यवस्थायाम् "आनि लोट्"[31] सूत्रमिदं प्र उपसर्गस्थनिमित्तात् रेफात् परस्य लोडादेशस्य आनि इत्यस्य नकारस्य स्थाने णत्वं करोति। अत्र प्रश्नो भवति यद् यदि "आनि लोट्" सूत्रस्य स्थाने "निलोट्" सूत्रं स्यात्तर्हि का हानिः। "निलोट्" सूत्रेणापि नि इत्यस्य नकारस्य णत्वं भवितुं शक्नोति। अतः आडागमविशिष्टम्[32] आनि इत्येतत्प्रकारकं ग्रहणं आगमशास्त्रमनित्यम् इति परिभाषायाः ज्ञापनं करोति।

**प्रकृतपरिभाषार्थः-** प्रकृतपरिभाषाया अर्थो विद्यते यद् आगमशास्त्रम् अनित्यं भवति अर्थात् आगमशास्त्रस्य क्वचित् प्रवृत्तिर्भवति क्वचिन्न भवति।

---

[9] पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 5/2/127

[10] अर्थानामयम् इति आर्थः, समाजः=समुदायः, आर्थश्चासौ समाजः=आर्थसमाजः, तेन ग्रस्तम्=आर्थसमाजग्रस्तम्।

[11] पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 4/1/83

[12] तेन दिव्यति खनति जयति जितम्- 4/4/2

[13] श्री-विश्वनाथमिश्रस्य 'सुबोधिनी' हिन्दीव्याख्योपेते परिभाषेन्दुशेखरे, हिन्दीटीकायां मूले च, पृष्ठसंख्या- 147,148

[14] पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 6/1/63

[15] पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 7/1/9

[16] पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 1/1/72

[17] श्री-विश्वनाथमिश्रस्य 'सुबोधिनी' हिन्दीव्याख्योपेते परिभाषेन्दुशेखरे, हिन्दीटीकायां मूले च, पृष्ठसंख्या- 148,149

[18] पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 1/1/56

[19] पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 6/4/20

[20] युष्मदस्मदोरन्यतरस्याम खञ् च- 4/3/1 सूत्रेण छ-प्रत्ययः, प्रत्ययोत्तरपदयोश्च- 7/2/98 सूत्रेण त्व-आदेशः।

[21] पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 7/1/13

[22] तत्करोति तदाचष्टे (गणसूत्रम्)

[23] प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च (गणसूत्रम्)

[24] पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 6/4/155

[25] पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 3/2/76

[26] सन्यङोः- 6/1/9

[27] पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 1/1/62

[28] पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 6/4/51

[29] पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 4/1/13

[30] पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 7/4/24

[31] पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 8/4/16

[32] आडुत्तमस्य पिच्च- 3/4/92

**प्रकृतपरिभाषायाः फलम्-** आगमशास्त्रस्य अनित्यत्वादेव सागरं तर्त्तुकामः इति प्रयोगे तर्त्तुम् इत्यत्र "आर्धधातुकस्येड् वलादेः"[33] सूत्रेण तुम् इत्यस्य वलादेः आर्धधातुकस्य इडागमो न भवति। अत्र अन्यद् उदाहरणं विद्यते- क्षुब्धो राजा, शाकं पचानस्य। क्षुब्धो राजा इत्यत्र "आर्धधातुकस्येड् वलादेः" सूत्रेण त इत्यस्य वलादेः आर्धधातुकस्य इडागमो न भवति तथा च शाकं पचानस्य इत्यत्र "आने मुक्"[34] सूत्रेण पच+आन इति दशायाम् आने परे अदन्ताङ्गस्य **पच** इत्यस्य मुँमागमो न भवति।

प्रधानाप्रधानयोः प्रधाने कार्यसम्प्रत्ययः[35]

**प्रकृतपरिभाषायाः प्रस्तावना-** "पुमान् स्त्रिया"[36] इति सूत्रेण स्त्रीवाचकशब्देन सह उक्तः पुंवाचकः शब्दः शिष्यते, यदि उभयत्र केवलं स्त्रीत्वपुंस्त्वकृतमेव वैरूप्यं स्यात्। यथा- हंसश्च हंसी चेति हंसौ। अत्र केवलं स्त्रीत्वपुंस्त्वकृतमेव वैरूप्यं दृश्यते न तु स्वरूपकृतं वैरूप्यम्। एवमेव ब्राह्मणवत्सा च ब्राह्मणीवत्सश्च इत्यत्रापि केवलं स्त्रीत्वपुंस्त्वकृतमेव वैरूप्यं विद्यते न तु स्वरूपकृतं वैरूप्यम्, अतः अत्रापि "पुमान् स्त्रिया" इति सूत्रेण एकशेषः स्यात् तत् कथन्न भवति? अस्याः समस्यायाः समाधानाय परिभाषा समागच्छति- प्रधानाप्रधानयोः प्रधाने कार्यसम्प्रत्ययः।

**प्रकृतपरिभाषायाः अर्थः तत्फलञ्च-** प्रधानाप्रधानयोर्मध्ये प्रधाने एव कार्यस्य सम्प्रत्ययः अर्थात् निश्चयो भवति। ब्राह्मणवत्सा च ब्राह्मणीवत्सश्च इत्यत्र वत्सः प्रधानः तथा च वत्सी प्रधाना विद्यते, किन्तु वत्सः तथा च वत्सी इत्यत्रैव न केवलं स्त्रीत्वपुंस्त्वकृतं वैरूप्यं विद्यते, अपितु अनयोः विशेषणवाचकयोः अर्थात् अप्रधानयोः ब्राह्मण-ब्राह्मणी-शब्दयोर्मध्येऽपि स्त्रीत्वपुंस्त्वकृतम् वैरूप्यं विद्यते। तस्मात् प्रधानेन सह अप्रधानेऽपि स्त्रीत्वपुंस्त्वकृतस्य वैरूप्यस्य सत्त्वाद् ब्राह्मणवत्सा च ब्राह्मणीवत्सश्च इत्यत्र एकशेषो न भवति। अनेन इदमपि सिद्धं भवति यद् प्रधानाप्रधानयोः तथा च प्रधाने, प्रधाने कार्यसम्प्रत्ययो भवति। अयमर्थः **प्रधाने** इति शब्दस्य आवृत्त्या बोध्यः। इयं परिभाषा "पुमान् स्त्रिया" सूत्रे "नपुंसकमनपुंकेन"[37] सूत्रे च स्पष्टा विद्यते।

**अन्तरङ्गोजीव्यादपि प्रधानस्य प्रबलत्वप्रतिपादनम्-** अन्तरङ्गोजीव्यादपि प्रधानं प्रबलं भवतीति "हेतुमति च"[38] सूत्रस्य भाष्यकैयटयोरुपलभ्यते। तद्यथा- पच्-धातोः प्रेरणार्थे णिच्-प्रत्यये सति णिजन्तः पाचि-धातुः सम्पन्नो भवति। यस्यार्थो भवति- विक्लित्यनुकूलव्यापारानुकूलव्यापारः। देवदत्तः पचति, तं पचन्तं देवदत्तं यज्ञदत्तः प्रेरयति इत्यर्थके पाचि धात्वर्थे यः प्रथमो व्यापारो विद्यते सः तु प्रयोज्यकर्तरि देवदत्ते तिष्ठति तथा च तदनुकूलो मुख्यो व्यापारः प्रयोजककर्तृनिष्ठः। अत्र णिजन्तभिन्नस्य मूल-पच्-धात्वर्थस्य विक्लित्यनुकूलव्यापारस्य आश्रयत्वात् प्रयोज्यस्य देवदत्तस्य "स्वतन्त्रः कर्ता"[39] सूत्रेण कर्तृ-संज्ञा प्राप्यते। इयं कर्तृ-संज्ञा अन्तरङ्गत्वात् प्राप्नोति, कारणम् अल्पापेक्षम् अन्तरङ्गं भवति। प्रकृतस्थले "स्वतन्त्रः कर्ता" सूत्रेण प्रयोज्यस्य देवदत्तस्य कर्तृ-संज्ञा भवेत् तदर्थं निमित्तभूतं तत्त्वं विद्यते- पच्-धात्वर्थ-विक्लित्यनुकूलव्यापाराश्रयत्वं तथा च "कर्तुरीप्सिततं कर्म"[40] सूत्रेण प्रयोज्यभूतस्य देवदत्तस्य कर्म-संज्ञा भवेत् तदर्थं निमित्तभूतं तत्त्वं विद्यते- णिचन्त-पाचि-धात्वर्थ-
विक्लित्यनुकूलव्यापारानुकूलव्यापारप्रयोज्यभूतफलाश्रयत्वम्। एवम्प्रकारेण कर्तृ-संज्ञायाः अन्तरङ्गत्वं सुस्पष्टमस्ति। कारणं कर्तृ-संज्ञायाः कृते मूलधात्वर्थः तथा च कर्म-संज्ञायाः कृते णिजन्तधात्वर्थोऽपेक्षितो भवति। अन्यच्च प्रयोज्यकर्तुः यः प्रयोजकीभूतः कर्ता विद्यते तस्य व्यापारं द्योतयितुं प्रेरणार्थकः णिच्-प्रत्ययः क्रियते, तस्य णिच्-प्रत्ययस्य कृते प्रयोज्यस्य कर्तृ-संज्ञा उपजीव्यभूता अस्ति। अनेन प्रकारेण अन्तरङ्गत्वाद् उपजीव्यत्वाच्च प्रयोज्यं प्राप्ता कर्तृ-संज्ञा प्रधानीभूतप्रयोजककर्तृक्रियाजन्यफलाश्रयत्वेन तमेव प्रयोज्यमाश्रित्य "कर्तुरीप्सिततं कर्म" सूत्रेण प्राप्तया कर्म-संज्ञया बाध्यते। एवम्प्रकारेण "गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ"[41] सूत्रेण प्राप्ता कर्म-संज्ञा यदि "कर्तुरीप्सिततं कर्म" सूत्रेणैव भवति, तर्हि कर्म-संज्ञां कर्तुम् "गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ" सूत्रस्य का आवश्यकता? अतः "गतिबुद्धि...स णौ" सूत्रमिदं व्यर्थीभूय प्रकृतसूत्रगतानां धातूनामेव प्रयोगे अण्यन्तावस्थायाः कर्तुः ण्यन्तावस्थायां कर्म-संज्ञा भवेदिति नियमार्थाय भवति तथा च देवदत्तः ओदनं पचति, तं पचन्तं देवदत्तं यज्ञदत्तः प्रेरयति इत्यर्थे पच्-धातोः प्रकृतसूत्रगतधातुष्वभावेन देवदत्तस्य कर्म-संज्ञाभावाद् अनुक्ते कर्तसंज्ञके देवदत्ते "कर्तृकरणयोस्तृतीया"[42] सूत्रेण तृतीया विभक्तिर्भवति तथा च पाचयति ओदनं देवदत्तेन यज्ञदत्तः इति वाक्यं सम्पन्नं भवति। अनेन सुस्पष्टं भवति यत्- प्रधानाप्रधानयोः प्रधाने कार्यसम्प्रत्ययः।[43]

पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुपसर्गाः[44]

**प्रकृतपरिभाषायाः** प्रस्तावना- "हलन्त्यम्" [45] सूत्रस्य आवृत्तिद्वारा अन्योन्याश्रयदोषस्य परिहारानन्तरमपि अन्योन्याश्रयदोषः पूर्ववत् स्थित एव अस्ति, कारणम् "न विभक्तौ तुस्माः"[46] सूत्रस्थविभक्तिपदबोध्यसुँप्तिङ्बोधः "हलन्त्यम्" इति उत्सर्गसूत्रस्य वाक्यार्थबोधानन्तरं सम्भवति तथा च "हलन्त्यम्" सूत्रस्य वाक्यार्थबोधः अपवादशास्त्रस्य "न विभक्तौ तुस्माः" इत्यस्य वाक्यार्थबोधोत्तरं सम्भवतीति चेन्न, अपवादशास्त्रस्य वाक्यार्थबोधात्पूर्वं पदपदार्थोपस्थितौ उत्सर्गशास्त्रस्य वाक्यार्थबोधे प्रतिबन्धकाभावात्। यतोहि प्रतियोगिज्ञानं विना निषेधशास्त्रवाक्यार्थबोधस्य असम्भवाद् यथा अभावज्ञाने प्रतियोगिज्ञानम् आवश्यकं भवति तथैव प्रतियोगिज्ञाने तस्य प्रतियोगिनः अभावज्ञानं कारणं भवतीति न सर्वसम्मतं विद्यते। अस्य स्थलस्य आशयोऽयं विद्यते यत् "हलन्त्यम्" सामान्यसूत्रस्य वाक्यार्थबोधः "न विभक्तौ तुस्माः" अपवादसूत्रस्य वाक्यार्थबोधं विनापि भवितुं शक्नोति, किन्तु "न विभक्तौ तुस्माः" सूत्रस्य वाक्यार्थबोधाय "हलन्त्यम्" सूत्रस्य वाक्यार्थबोधः आवश्यको विद्यते।[47]

**आपत्तिपूर्वकं प्रकृतपरिभाषायाः** अर्थः, भावः तत्फलञ्च- पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुपसर्गाः अस्याः परिभाषायाः अयं भावो विद्यते यद् अस्मादृशाः ये लक्षणैकचक्षुष्काः[48] जनाः वर्तन्ते ते यदि सामान्यशास्त्रस्य प्रवृत्तिं तस्य सर्वेषु उदाहरणेषु सम्पादयन्ति, तर्हि भुक्तवन्तं प्रति मा भुङ्क्था (भुक्तवन्तं जनं प्रति भोजनं मा कुरु) इति वाक्यं यथा व्यर्थं भवति तथैव अपवादशास्त्रमपि व्यर्थं भविष्यति। तस्मात् कारणाद् अपवादशास्त्रविषयपर्यालोचनपुरःसरम् एव अपवादशास्त्रविषयकलक्ष्याणां निर्धारणं कृत्वा अपवादशास्त्रस्य अविषयेषु तत्तल्लक्ष्येषु उत्सर्गशास्त्रस्य लक्ष्यानुरोधेन तस्य उत्सर्गशास्त्रस्य उपप्लवद्वारा अर्थात् आवृत्तिद्वारा उत्सर्गशास्त्रेण लक्ष्यसंस्कारः अस्माभिः करणीयः। अन्यथा अस्माकं कृते उभयविधशास्त्रस्य प्रमाणिकत्वाद् यदि वयम् उत्सर्गापवादयोः शास्त्रयोः

---

[33] पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 7/3/35

[34] पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 7/2/82

[35] श्री-विश्वनाथमिश्रस्य 'सुबोधिनी' हिन्दीव्याख्योपेते परिभाषेन्दुशेखरे, मूले, पृष्ठसंख्या- 415

[36] पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 1/2/67

[37] पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 1/2/69

[38] पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 3/1/26

[39] पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 1/4/54

[40] पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 1/4/49

[41] पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 1/4/52

[42] पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 2/3/18

[43] श्री-विश्वनाथमिश्रस्य 'सुबोधिनी' हिन्दीव्याख्योपेते परिभाषेन्दुशेखरे, हिन्दीटीकायां मूले च, पृष्ठसंख्या- 415, 416

[44] श्री-विश्वनाथमिश्रस्य 'सुबोधिनी' हिन्दीव्याख्योपेते लघुशब्देन्दुशेखरे, हिन्दीटीकायां मूले च, पृष्ठसंख्या- 35

[45] पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 1/3/3

[46] पाणिनीय-अष्टाध्यायी-सूत्रपाठः- 1/3/4

[47] श्री-विश्वनाथमिश्रस्य 'सुबोधिनी' हिन्दीव्याख्योपेते लघुशब्देन्दुशेखरे, हिन्दीटीकायां मूले च, पृष्ठसंख्या- 33, 34

[48] लक्षणम्=सूत्रम् एकम्=प्रधानं चक्षुः यस्य स लक्ष्यैकचक्षुष्कः।

एकस्मिन् लक्ष्ये क्रमशः प्रवृत्तिं साधयामश्चेद् विकल्पापत्तिर्भवति। यद्यपि भुक्तवन्तं प्रति मा भुङ्क्था इति न्यायोऽपि लुगादिना जातनिवृत्तेः सत्त्वाद् व्यभिचरितः=प्रभावहीनो भवति तथापि तत्र लुगादिना अभावं प्राप्तस्य अनुत्पत्तिरेव स्वीक्रियते, अतः नास्ति कश्चन दोषः। पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुपसर्गाः अस्याः परिभाषायाः अनङ्गीकारे सति उपर्युक्तरीत्या विकल्पापत्तिर्भवति। अभिनिविशन्ते इत्यस्य बुद्ध्यारूढा भवन्ति इत्यर्थः, अर्थात् अपवादशास्त्रस्य विषयं मनसि निधाय तथा च तद्विषयं परित्यज्य उत्सर्ग-शास्त्रस्य प्रवृत्तिर्ज्ञेया लक्ष्येषु इति बोध्यम् अस्माभिः। यद्यपि लक्ष्यैकचक्षुष्कः[49] तत्तदुत्सर्गशास्त्रस्य पर्यालोचनं विना उत्सर्गशास्त्रेण लक्ष्यसंस्कारं कर्तुं समर्थो विद्यते तथापि शास्त्रप्रकियास्मरणपूर्वकमेव लक्ष्यसंस्कारं करोति, तथैव धर्मोत्पत्तेः सत्त्वात्। तदेव उक्तम्- प्रकल्प्य चापवादविषयं तत उत्सर्गः प्रवर्तते। अत्र परिभाषायां प्रकल्प्य-शब्दस्य अर्थो विद्यते- परित्यज्य।[50]

## कूपखानकन्यायः

**प्रकृतन्यायस्य प्रस्तावना-** शब्दस्य ज्ञाने धर्म आहोस्वित् प्रयोगे इति चर्चाविषये यदा ज्ञाने धर्मारिति स्वीक्रयते तदा शब्दज्ञाने यथा धर्मः तथैव अपशब्दज्ञाने अधर्मस्य प्राप्तिः प्राप्नोति, अतः एतदुत्तरं समीचीनं नास्ति। अस्य प्रश्नस्य उतरेषु-

**अत्र प्रथमम् उत्तरम्-** उपर्युक्त-समस्यायाः समाधानम् एवं रीत्या दीयते यद् वयं वैयाकरणाः शब्दप्रमाणकाः। शब्दज्ञाने धर्म इति तु उल्लिखितं विद्यते किन्तु अपशब्दज्ञानेऽधर्म इति शब्दशः कुत्रापि उल्लिखितं नास्ति। अपशब्दज्ञानेऽधर्म इति अर्थात् लभ्यते। शिष्टैरप्रतिषिद्धं यद्भवति तन्न दोषाय भवति नैव अभ्युदयाय। यथा हिक्कित-हसित-कण्डूयितानि न तु दोषाय भवन्ति नैव अभ्युदयाय।

**द्वितीयम् उत्तरम्-** विषयेऽस्मिन् द्वितीयम् उत्तरं कुर्वन् भाष्यकारो भणति- शब्दज्ञाने अपशब्दज्ञानम् अभ्युपायो विद्यते। शब्दज्ञाने धर्म इति कथनेन इदम् अर्थात् ज्ञातं भवति यद् अपशब्दज्ञानपूर्वके शब्दज्ञाने धर्मो भवति।

**तृतीयम् उत्तरम्-** क्रमेऽस्मिन् तृतीयम् उत्तरं विद्यते- कूपखानकवद् एतद्भविषयति। यथा कूपखानकः कूपखननकाले मृदापांसुभिः पूर्वन्तु दूषितो भवति, किन्तु अप्सु संजातासु पुनः तत एव मृदादिकं दूरीकरोति तथा च भूयसा अभ्युदयेन सह तस्य योगो भवति। एवम्प्रकृतस्थलेऽपि अपशब्दज्ञानेन योऽधर्मो भवति सोऽधर्मः शब्दज्ञानेन धर्मे सति तेन दूरीक्रियते। अत्र तृतीयं यद् उत्तरं प्रदत्तं विद्यते तदुत्तरं कूपखानकन्यायेन स्वीक्रियते। अयमाशयो विद्यते- कूपखानकन्यायस्य।[51]

## निष्कर्ष

उपर्युक्त-प्रकारेण इदं सिद्धं भवति यद् एककार्यस्य सिद्ध्यर्थं चयनितम् एकम् उत्तरं केवलं तदर्थमेव अस्ति इति न, अपितु तेन अन्यासां समस्यानामपि समाधानं कर्तुं शक्यते। अतः एकेन उत्तरेण, एकेन वस्तुना अस्माभिरपि बहुविधं कार्यं स्वजीवने साधनीयं येन लाघवं स्यादिति।

## सन्दर्भ


1. श्री-विश्वनाथमिश्रस्य 'सुबोधिनी' हिन्दीव्याख्योपेतः परिभाषेन्दुशेखरः प्रकाशक- चौखम्भा संस्कृत प्रकाशन, वाराणसी। पुनर्मुद्रित संस्करण-2009
2. बालमनोरमा-तत्त्वबोधिनीसहिता वैयाकरणसिद्धान्तकौमुदी प्रकाशक- मोतीलाल बनासीदास, दिल्ली, वाराणसी, पटना पुनर्मुद्रण दिल्ली, 1979
3. अष्टाध्यायी सूत्रानुक्रमणिका (App) Directed by- Prof. M. M. Jha Developed by- Srujan Jha
4. श्री-विश्वनाथमिश्रस्य 'सुबोधिनी' हिन्दीव्याख्योपेतः पञ्चसन्धयन्तः लघुशब्देन्दुशेखरः प्रकाशक- चौखम्भा संस्कृत प्रतिष्ठान, दिल्ली। पुनर्मुद्रित संस्करण-2008
5. व्याकरण-महाभाष्य अनुवादक एवं विवरणकार- चारुदेव शास्त्री प्रकाशक- मोतीलाल बनासीदास, दिल्ली, वाराणसी, पटना, बंगलौर, मद्रास पुनर्मुद्रण-1995


[49] लक्ष्यम्=उदाहरणम् एकम्=प्रधानं चक्षुः यस्य स लक्ष्यैकचक्षुष्कः।

[50] श्री-विश्वनाथमिश्रस्य 'सुबोधिनी' हिन्दीव्याख्योपेते लघुशब्देन्दुशेखरे, हिन्दीटीकायां मूले च, पृष्ठसंख्या- 35, 36

[51] चारुदेव-शास्त्रि-महोदयस्य हिन्दी-अनुवाद-सहिते महाभाष्ये पृष्ठसङ्ख्या- 36-39